**शि(सि)क्थ** न० शिच-थक् कुक् च पृषो० सस्य शोवा। (मोम) मधूच्छिष्टे अमरः। स्वार्थे क। तत्रैव।

**शिक्य** न० शि-यत् कुक् च। (शिका) रज्जुकृते पदार्थे शब्दर०

**शिक्यित** त्रि० शिक्यं शिक्यस्थं करोति शिक्य+णिच्-कर्म्मणि क्त। शिक्याधारे स्थापिते पदार्थे।

**शिक्ष** अभ्यासे भ्वा० आ० सक० सेट्। शिक्षते अशिशिक्षिष्ट।

**शिक्षा** स्त्री शिक्ष-भावे अ। १अभ्यासे २वर्णानामुच्चारणप्रदर्शके वेदाङ्गे ३पन्यभेदे अमरः। ४श्योनाकवृक्षे शब्दच०। "वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति। शिक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तः शिक्षाध्याय इति" ऋ०भा०| "अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा। शास्त्रानुपूर्वं तद्विद्याद् यथोक्तं लोकवेदयोः। प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः। पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम्। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा। स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च+कँपौ चापि पराश्रितौ। दुःस्पृष्टश्चेति विज्ञेय ऌकारः प्लुत एव च। आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्। प्रातःसवनयोगन्तं छन्दोगायत्रमाश्रितम्। कण्ठे माध्यन्दिनयुतं मध्यमं त्रैष्टुभानुगम्। तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः। स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः। इति वर्णविदः प्राहुर्निपुणास्तं निबोधत। उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि। उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ। स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः। अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च। ओभावश्च विवृत्तिश्च श-ष-सा रेफ एव च। जिह्वामूलमुपाध्मानं गतिरष्टविधोष्मणः। यद्योभावप्रसन्धानमुकारादि परं पदम्। स्वरान्तं तादृशं विद्याद् यदन्यद्व्यक्तमूष्मणः। हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्। कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू। स्युर्मूर्द्धन्या ऋटुरषा-दन्त्या ऌ-तु-ल-साः स्मृताः। जिह्वामूले तु कुः प्रोक्तो दन्त्यौष्ठ्यो वः स्मृतो बुधैः। एऐ तु कण्ठतालव्यावोऔ कण्ठौष्ठजौ स्मृतौ। अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्। ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम्। संवृतं मात्रिकं ज्ञेयं विवृतन्तु द्विमात्रिकम्। घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः। स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्। तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च। अनुस्वारयमानाञ्च नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिनः। अलाबुवीणानिर्घोषो दन्त्यमूलस्वराननु। अनुस्वारस्तु कर्त्तव्यो नित्यं ह्रोः शषसेषु च। अनुस्वारो विवृत्यस्तु विरामे चाक्षरद्वये। द्विरोष्ठ्यौ तु विगृह्णीयाद् यत्रौकारवकारयोः। व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्। भीतापतनभेदाभ्यां तद्वत् वर्णान् प्रयोजयेत्"। "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथा। शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः। यमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः"। "ईषन्नादा यणो जश्च श्वासिनश्च खफादयः। ईषच्छ्वासांश्चरो विद्यात् गोर्धामैतत् प्रचक्षते। दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि। छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"। "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्। "अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम्। अक्षता शस्त्ररूपेण वज्रं पतति मस्तके। हस्तहीनन्तु योऽधीते स्वरवर्णविवर्जितम्। ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति" पाणिनिशिक्षा। नारदशिक्षा व्यासशिक्षादयो अन्याः सन्ति विस्तरभयान्नोक्ताः।

**शिक्षाकर** पु० शिक्षां करोति कृ-अच्। १व्यासे शब्दमा० २शिक्ष्यशिक्षाकर्त्तरि।

**शिक्षागुरु** पु० विद्यादातरि।

**शिक्षित** त्रि० शिक्षा जाताऽस्य तार० इतच् शिक्ष-क्त वा। १कृताभ्यासे २निपुणे ३विज्ञे च अमरः।